ज्योतुष्वाट्च: ८ दशेन्धन: ९ दीपालिलक: १० दोषास्य: ११ नयनोत्सव: १२ । इति शब्दरत्नावली ॥ (यथा, मनौ । ४ । २२९ ।
"वारिदस्तृप्तिमाप्नोति सुखमच्चय्यमन्नद: ।
तिलप्रद: प्रजामिष्टां दीपदश्चचुरुत्तमम् ॥")
तदर्थं स्नेहादिनियमो यथा,—
"घृतं तैलञ्च दीपार्थं स्नेहान्यन्यानि वर्ज्जयेत् ।"
इत्यादौ वह्निपुराणे आह्निकतमोनामाध्याय: ॥
अन्यच्च ।
"पुरश्चरणकालेच दीपं दद्यादिह भैरव ! ।
दीपेन लोकान् जयति दीपस्तेजोमय: स्मृत: ॥
चतुर्व्वर्गप्रदो दीपस्तस्माद्दीपैर्य्यजेत् श्रिये ॥"
इत्युपक्रम्य,—
"घृतप्रदीप: प्रथमस्तिलतैलोद्भवस्तत: ।
सार्षप: फलनिर्यासजातो वा राजिकोद्भव: ॥
दधिजश्चान्नजश्चैव प्रदीपा: सप्त कीर्त्तिता: ।
पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ॥
शाणजा वादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा: स्मृता: ॥*॥
तैजसं दारवं लौहं मार्त्तिक्यं नारिकेलजम् ।
तृणध्वजोद्भवं वापि दीपपात्रं प्रशस्यते ॥*॥
दीपवृत्ताश्च कर्त्तव्यास्तैजसादौश्च भैरव ! ।
वृत्तेषु दीपो दातव्यो न तु भूमौ कदाचन ॥
सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापं तथैव च ॥
तस्माद्यथा तु पृथिवी तापं नाप्नोति वै तथा ।
दीपं दद्यान्महादेवि अन्येभ्योऽपि च भैरव ! ॥
कुर्व्वन्तं पृथिवीतापं यो दीपमुत्सृजेन्नर: ।
स ताम्रतापं नरकमाप्नोत्येव शतं समा: ॥
सुवृत्तवर्त्तिसंस्नेहपात्रेऽभग्ने सुदर्शने ।
स्थापयेद् वृक्षकोटौ तु दीपं दद्यात् प्रयत्नत: ॥
लभ्यते यस्य तापस्तु दीपस्य चतुरङ्गुलात् ।
न स दीप इति ख्यातो ह्योघवह्निस्तु स स्मृत: ॥
नेत्राह्लादकर: खर्च्चिर्दूरतापविवर्ज्जित: ।
सुशिख: शब्दरहितो निर्धूमो नातिह्रस्वक: ॥
दक्षिणावर्त्तवर्त्तिस्तु प्रदीप: श्रीविवृद्धये ।
दीपवृक्षस्थिते पात्रे शुद्धस्नेहप्रपूरिते ॥
दक्षिणावर्त्तवर्त्या तु चारुदीप्त: प्रदीपक: ।
उत्तम: प्रोच्यते पुत्र ! सर्व्वतुष्टिप्रदायक: ॥
वृत्तेन वर्ज्जितो दीपो मध्यम: परिकीर्त्तित: ।
विहीन: पात्रतैलाभ्यामधम: परिकीर्त्तित: ॥
शाणं वा वादरं वाल्कं जीर्णं मलिनमेव वा ।
उपयुक्तन्तु नो दद्यात् वर्त्तिकार्थन्तु साधक: ॥
उपाददीत्यान्नूतनमेव सततं श्रीविवृद्धये ॥ * ॥
कोषजं रोमजं वल्कं वर्त्तिकार्थं न चाददेत् ।
न मिश्रीकृत्य दद्यात्तु दीपं स्नेहान् घृतादिकान् ॥
कृत्वा मिश्रीकृतं स्नेहं तामिस्रं नरकं व्रजेत् ।
वसामज्जास्थिनिर्यासै: स्नेहै: प्राण्यङ्गसम्भवै: ॥
प्रदीपं नैव कुर्य्यात्तु कृत्वा पङ्के विषीदति ।
अस्थिपात्रेऽथवा गवि दुर्गन्धादुपवासिनि ॥
नैव दीप: प्रदातव्यो विबुध: श्रीविवृद्धये ।
नैव निर्व्वापयेद्दीपं कदाचिदपि यत्नत: ॥
सततं लक्षणोपेतं देवार्थमुपकल्पितम् ।
न हरेच्चज्ञानतो दीपं तथा लोभादिना नर: ॥
दीपहर्त्ता भवेदन्ध: काणो निर्व्वापको भवेत् ।
उद्दीप्तदीपप्रतिम: कालकाण्डसमुद्भव: ॥
विश्वेश्वोद्भवमेवाथ दीपालाभे निवेदयेत् ।
उल्मुकं नैव दीपार्थं कदाचिदपि चोत्सृजेत् ॥
प्रसन्नार्थन्तु तं दद्यादुपचारादिहि:कृतम् ।
एवं वां कथितो दीपो धूपश्च श्रूयतं सुतौ ॥"
इति कालिकापुराणे ६८ अध्याय: ॥
श्राद्धे वस्त्रवर्त्तियुक्तदीपनिषेधो यथा,—
"दीपं वर्जयेत् वस्त्रवर्त्त्या प्रत्यक्षं तैलमेव च ।"
इति योगिनीतन्त्रे प्रथमतमे २ भागे ५ पटल: ॥
कार्त्तिकमासे दीपदानस्य माहात्म्यं यथा,—
"शृणु दीपस्य माहात्म्यं कार्त्तिके च हरिप्रिय ! ।
यस्य श्रवणमात्रेण दीपदाने मतिर्भवेत् ॥
सूर्य्यग्रहे कुरुक्षेत्रे नर्म्मदायां शशिग्रहे ।
तुलादानस्य यत् पुण्यं तदूर्द्ध्वे दीपदानत: ॥
घृतेन दीपकं यस्तु तिलतैलेन वा पुन: ।
ज्वालयेन्मुनिशार्दूल ! अश्वमेधेन तस्य किम् ॥
तेनेष्टं क्रतुभि: सर्व्वं कृतं तीर्थावगाहनम् ।
दीपदानं कृतं येन कार्त्तिके केशवाग्रत: ॥
तावद्गर्ज्जन्ति पापानि देहेऽस्मिन् मुनिसत्तम ! ।
यावत् कार्त्तिकमासेन दीपदानं कृतं भवेत् ॥
तावद्गर्ज्जन्ति पुण्यानि स्वर्गे मर्त्ये रसातले ।
यावत्तु ज्वलते दीप: कार्त्तिके केशवाग्रत: ॥
श्रूयतेऽपि पितृभिर्गाथा गीता महामुने ! ।
भविष्यन्ति कुलेऽस्माकं कदाचित्ते सुता भुवि ॥
कार्त्तिके दीपदानैर्ये तोषयिष्यन्ति केशवम् ।
अपि नस्ते भविष्यन्ति कुले सुचरिता गुणै: ।
दीपदानं कार्त्तिके ये दास्यन्ति हरितुष्टिदम् ॥
गयायां पिण्डदानेन कृतं न प्रीणनं सुतै: ।
येऽपि कार्त्तिके दत्तो दीपस्तुष्टिकरो हरे: ॥
दीपं दास्यन्ति ये पुत्रास्तुष्ट्यर्थं चक्रपाणिन: ।
कार्त्तिके तैर्मुनिश्रेष्ठ ! नरकादुद्धृता वयम् ॥
मन्त्रहीनं क्रियाहीनं शुद्धिहीनं जनार्द्दन ! ।
व्रतं संपूर्णतां यातु कार्त्तिके दीपदानत: ॥
अनेनैव हि मन्त्रेण दीपं संकल्पयेन्मुने ! ।
मधुसूदनतुष्ट्यर्थं कार्त्तिके मुनिपुङ्गव: ॥"
इति पाद्मे उत्तरखण्ड: ॥
अपि च ।
"दास्यते देवदेवाय दीपपुष्पानुलेपनम् ।
अपि न: स कुले भूयादेकादश्यां तिथौ नर: ॥
करिष्यत्युपवासन्तु सर्व्वपातकहानिदम् ।
इत्थं पितॄणां वचनं श्रुत्वा नृपतिसत्तम: ॥
ददौ च दीपान् विधिवत् विष्णोरायतने बलि: ।
सुगन्धतैलसंपूर्णान् दीपान् सद्वृत्ततैलकान् ॥
सर्षपस्य सुतैलेन मधुकातसिसम्भवै: ।
दीपप्रदानान्नरकानन्धतामिस्रसंज्ञकान् ।
तीर्त्वा सभार्य्यया नव्रन् ! विष्णुलोकमगात्तत: ॥"
इति वामनपुराणम् ॥
दीपं स्पृष्ट्वा वैधकर्म्मकरणे दोषो यथा,—
"दीपं स्पृष्ट्वा तु यो देवि ! मम कर्म्माणि कारयेत् ।
तस्यापराधाद्वै भूमे ! पापं प्राप्नोति मानव: ।
तच्छृणुष्व महाभागे ! कथ्यमानं मयानघे ! ॥
जायते षष्टिवर्षाणि कुष्ठी गात्रपरिप्लुत: ।
चाण्डालस्य गृहे तत्र एवमेव न संशय: ॥
एवं भूत्वा तु तत् कर्म्म मम क्षेत्रे मृतो यदि ।
मद्भक्तश्चैव जायेत शुद्धे भागवते गृहे ॥
प्रायश्चित्तं प्रवक्ष्यामि दीपस्य स्पर्शनाद्भुवि ।
तरन्ति मनुजा येन कष्टं चाण्डालयोनिषु ॥
यस्य कस्यापि मासस्य शुक्लपक्षे च द्वादशी ।
चतुर्थभक्तमाहारमाकाशशयने क्षपेत् ॥
दीपं दत्त्वापराधाद्वै तरन्ति मनुजा भुवि ।
शुचिर्भूत्वा यथान्यायं मम कर्म्म पथे स्थित: ॥
एतत्ते कथितं देवि ! स्पर्शनात् दीपकस्य तु ।
संसारशोधनश्चैव यत् कृत्वा लभते शुभम् ॥"
इति वराहपुराणम् ॥ * ॥
पुरुषस्य दीपनिर्व्वापणे दोषो यथा,—
"दीपनिर्व्वापणात् पुंस: कुष्माण्डच्छेदनात् स्त्रिय: ।
अचिरेणैव कालेन वंशनाशो भवेद्ध्रुवम् ॥*॥
देवार्थकल्पितदीपस्य निर्व्वापणे दोषो यथा,—
नैव निर्व्वापयेद्दीपं देवार्थमुपकल्पितम् ।
दीपहर्त्ता भवेदन्ध: काणो निर्व्वापको भवेत् ॥"
इत्येकादशीतत्त्वे कालिकापुराणम् ॥
कार्त्तिककृष्णचतुर्द्दश्यां नरकनिवृत्तये दीपदानं यथा,—
"नरकाय प्रदातव्यो दीप: संपूज्य देवता: ।"
इति तिथितत्त्वधृतलिङ्गपुराणम् ॥ * ॥
पृथिव्यां दीपो न संस्थाप्य: । यथा,—
"सर्व्वंसहा वसुमती सहते न त्विदं द्वयम् ।
अकार्य्यपादघातञ्च दीपतापस्तथैव च ॥"
इत्येकादशीतत्त्वधृतकालिकापुराणम् ॥

दीपकं, क्ली, (दीपयतीति । दीप् + णिच् + ण्वुल् ।) वाक्यालङ्कार: । दीपिकारके, त्रि । इति मेदिनी । के, १०४ ॥ कुङ्कुमम् । इति शब्दरत्नावली ॥*॥
वाक्यालङ्कारस्य लक्षणं यथा,—
"पदार्थानां प्रस्तुतानामन्येषां वा यदा भवेत् ।
एकधर्म्माभिसम्बन्ध: स्यात्तदा तुल्ययोगिता ॥
अप्रस्तुतप्रस्तुतयोर्दीपकन्तु निगद्यते ।
अथ कारकमेकं स्यादनेकासु क्रियासु चेत् ॥
यथा, माघे ।
बलावलेपादधुनापि पूर्व्ववत्
प्रबाध्यते तेन जगज्जिगीषुणा ।
सती च योषित् प्रकृतिश्च निश्चला
पुमांसमभ्येति भवान्तरेष्वपि ॥"
इति साहित्यदर्पणे ।१०।६७॥
अपि च काव्यचन्द्रिकायाम् ।
"जातिक्रियागुणद्रव्यवाचकेन पदेन तु ।
एकत्र वर्त्तिना सर्व्ववाक्यार्थो दीपकम्भवेत् ॥"
यथा,—
"भ्रमद्भ्रमरभङ्कारपुंस्कोकिलकलध्वनि: ।
मन्दचन्दनवातोऽपि हरन्ति हृदयं नृणाम् ॥"